# महात्मा-गाँधी-केन्द्रीय-विश्वविद्यालयः, बिहारः

## मानविकी एवं भाषासंकायः

# संस्कृतविभागः

एम. ए. द्वितीयसत्रम्

विषयः- लघुसिद्धान्तकौमुदी

Code – SNKT2001

उपविषयः- विसर्गसन्धिप्रकरणम्

डॉ. श्याम कुमार झा
सह- आचार्यः, संस्कृतविभागः
महात्मा-गाँधी-केन्द्रीय-विश्वविद्यालयः

# पदसाधनम्

# (लघुसिद्धान्तकौमुदी)

# विसर्गसन्धिप्रकरणम्

# विष्णुस्त्राता

विष्णुः त्राता इति स्थिते

विष्णुस् त्राता विसर्जनीयस्य सः इति सूत्रेण विर्सगस्य स्थाने स आदेशे

विष्णुस्त्राता पदसिद्धम् ।

# हरिः शेते

| | |
|---|---|
| हरिस् शेते | इति स्थिते |
| हरिः शेते | ‘वा शरि’ इति सूत्रेण वैकल्पिकविसर्जनीयः |
| हरिः शेते | पदसिद्धम् । |
| हरिश्शेते | (विर्सर्गाभावपक्षे) |

# शिवोऽर्चः

शिवस् अर्च्यः इति स्थिते
शिव रु अर्च्यः 'ससजुषो रुः' इति सूत्रेण सकारस्य रु इति आदेशे
शिव उ अर्च्यः 'अतो रोरप्लुतादप्लुते' इति सूत्रेण रु स्थाने उ आदेशे
शिवो अर्च्यः 'आद्गुणः' इत्यनेन अकार उकारयोः गुणादेशे
शिवोऽर्च्यः एङः पदान्तादति इति सूत्रेण पूर्वरूपम्
शिवोऽर्च्यः पदसिद्धम्।

# शिवो वन्द्यः

| | |
|---|---|
| शिवस् वन्द्यः | इति स्थिते |
| शिव रु वन्द्यः | ससजुषो रूः इत्यनेन स् स्थाने रू आदेशे |
| शिव उ वन्द्यः | हशि च इत्येनन रू स्थाने उ आदेशे |
| शिवो वन्द्यः | आद्गुणः इत्यनेन अकार-उकारयोः गुणादेशे |
| शिवो वन्द्यः | पदसिद्धम् । |

# देवा इह

| | |
|---|---|
| देवास् इह | इति स्थिते |
| देवा रु इह | ससजुषो रुः इति सूत्रेण स स्थाने रु आदेशे |
| देवा य इह | भोभगोअघोअपूर्वस्य योऽशि इति सूत्रेण य आदेशे |
| देवा इह | लोपः शाकलस्य इति सूत्रेण यकारस्य लोपप्राप्ते |
| देवा इह | पदसिद्धम्। |
| देवायिह | (लोपाभावे) |

# भो देवाः

| | |
|---|---|
| भोस् देवाः | इति स्थिते |
| भो रु देवाः | ससजुषो रुः इति सूत्रेण स स्थाने रु आदेशे |
| भो य देवाः | भोभगोअघोअपूर्वस्य योऽशि इति सूत्रेण य आदेशे |
| भो देवाः | हलि सर्वेषाम् इत्यनेन यकारस्य लोपे |
| भो देवाः | पदसिद्धम् । |

## अहरहः

| | |
|---|---|
| अहन् अहन् | इति स्थिते |
| अहर् अहर् | रोऽसुपि इति सूत्रेण न् इत्यस्य रेफादेशे |
| अहरहः | खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफस्य विर्सर्गादेशे |
| अहरहः | पदसिद्धम् । |

# पुना रमते

पुनर् रमते इति स्थिते
पुन रमते रो रि इत्येनन रेफस्य लोपप्राप्ते
पुना रमते ढ्रलोपे पूर्वस्य दीर्घोऽणः इत्यनेन नकारात् अकारस्य दीर्घादेशे कृते
पुना रमते पदसिद्धम् ।

# मनोरथः

| | |
|---|---|
| मनस् रथः | इति स्थिते |
| मन रु रथः | ससजुषो रुः इति सूत्रेण सकार स्थाने रु आदेशे अनुबन्धलोपे च |
| मन र् रथः | पूर्वत्राऽसिद्धम् इति सूत्रेण रो रि इत्यस्य निषेधे कृते हशि च इत्यनेन सूत्रेण रु-स्थाने उत्त्वे |
| मन उ रथः | आद्गुणः इत्यनेन गुणादेशे कृते |
| मनोरथः | पदसिद्धम् । |

# धन्यवादः